**Code No.: MFSA-02**

Total No. of Questions : 5 | Total No. of Printed Pages : 2

# स्नातकोत्तरपरीक्षाः– २०१५

## एम्.ए. – विद्वदुत्तमा – प्रथमवर्षः

## शास्त्रम् – अलङ्कारशास्त्रम्

### भागः – २, पत्रिका – २

### विषयः – ध्वन्यालोकः – १

**दिनाङ्कः –** 26-3-2015 | **गरिष्ठाङ्काः – ८०**

**समयः –** 10.00 A.M. to 1.00 P.M. | Max. Marks – 80

---

**I. संक्षिप्तमुत्तरं लिखत –** **10 × 1 = 10**

१. ध्वनिकारः मङ्गलपधेन कान् स्तौति?

२. ध्वन्यालोकस्य लोचनमिति व्याख्यानं केन कृतम्?

३. 'स्वस्छस्वच्छायायासितेन्दवः' इत्यत्र कः शब्दालङ्कारः?

४. काव्यस्यात्मा ध्वनिरिति विषये प्रसक्ते केचित् किमूचुः?

५. महाकवीनां सरस्वती अलोकसामान्यं कमभिव्यनक्ति?

६. अविवक्षितवात्त्यध्वनेः नामान्तरं किम्?

७. रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि – अत्र ध्वनेः कः प्रभेदः?

८. श्रुतिदुष्टादयो दोषाः कस्मिन् रसे हेयाः?

९. सन्निहितबालान्धकारापि भास्वन्मूर्तिः – अत्रार्थालङ्कारः कः?

१०. अर्थशक्त्युद्भवध्वनिः कस्य ध्वने प्रभेदः?

**II. वाक्यत्रयं सप्रसङ्गं व्याख्यात –** **3 × 5 = 15**

१. बहुधा व्याकृतः सोऽयं ततो नेह प्रतन्यते।

२. सहि क्वचिद्विभिन्नविषयत्वेन व्यवस्थापितः।

३. रसादिरर्थो हि सहेव वाच्येनावभासते।

४. काले च ग्रहणत्यागौ।

५. यथा च मायारामशिरोदर्शनेन विह्वलायां सीतादेव्यां सेतौ।

**Code No.: MFSA-02**

**III.** त्रयाणामुत्तरं लिखत – **3 × 10 = 30**

१. भाक्तमाहुस्तमन्ये – तेषामाशयः कः? विवृणुत।

२. काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्व वियोगोत्थः शोकः श्लोकत्वमागतः।।
कारिकामिमां सविस्तरं व्याख्यात।

३. ध्वनिकाव्यस्य लक्षणं किम्? सदलकृत्यं विवेचयत।

४. लक्षणामूलध्वनेः द्वौ प्रभेदौ कौ? सोदाहरणं निरूपयत।

५. को नाम शब्दशक्त्युद्भवध्वनिः? सलक्षणोदाहरणं निरूपयत।

**IV.** पद्यत्रयं सप्रसङ्गं व्याख्याय तत्रत्यविशेषं सयुक्तिकं स्फोरयत – **3 × 5 = 15**

१. भ्रम धार्मिक! विस्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदावरीनदीकुञ्जवासिना दृप्तसिंहेन।।

२. अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः।
अहो दैवगतिश्चित्रा तथापि न समागमः।।

३. सज्जेइ सुरहिमासो ण दाव अप्पेइ जुअइजणलक्खमुहे।
अहिणवसहआरमुहे णवपत्तले अणङ्गस्स शरे।।

४. शिखिपिच्छकर्णपूरा जाया व्याधस्य गर्विणी भ्रमति।
मुक्ताफलरचितप्रसाधनानां मध्ये सपत्नीनाम्।।

**V.** कारिकाद्वयं सप्रसङ्गं व्याख्यात। – **2 × 5 = 10**

१. योऽर्थः सहृदयशलाध्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।।

२. रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः।
तद्व्यक्तिहेतू शब्दार्थावाश्रित्यौजो व्यवस्थितम्।।

३. ध्वन्यात्मभूते श्रृङ्गारे यमकादिनिबन्धनम्।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः।।

---